# श्रीगुरु पूजन विधान

## (वैदिक पूजन पद्धति-पुरुषसूक्त एवं श्रीसूक्तादि से पूजन)

### (१) ध्यान

ॐ

नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः।।
ॐ गुरुदेवाय विद्महे परब्रह्माय धीमहि तन्नो गुरु प्रचोदयात्।
-श्रीगुरुदेवाय नमः। ध्यानार्थे पुष्पाणि समर्पयामि।

### (२) आवाहन

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिम् सर्वत स्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ।।१।।
हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्।
चन्द्रां हिरण्यमयीं लक्ष्मीं जातवेदो म आवह ।।१।।
ॐ गुरुदेवाय विद्महे परब्रह्माय धीमहि तन्नो गुरु प्रचोदयात्।
-श्रीगुरुदेवाय नमः। आवाहनार्थे पुष्पाणि समर्पयामि।

### (३) आसन

ॐ पुरुष एवेदम् सर्वम् यद्भूतं यच्च भाव्यम् ।
उतामृतत्वश्येशानो यदेन्नातिरोहति ।।२।।
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ।।२।।
ॐ गुरुदेवाय विद्महे परब्रह्माय धीमहि तन्नो गुरु प्रचोदयात्।
-श्रीगुरुदेवाय नमः। आसनार्थे पुष्पाणि समर्पयामि।

## (४) पाद्यं

ॐ एतावानस्य महिमातो ज्यायाँश्च पुरुषः।
पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।।३।।

अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम्।
श्रियं देवीमुपह्वये श्रीर्मा देवीर्जुषताम् ।।३।।

ॐ गुरुदेवाय विद्महे परब्रह्माय धीमहि तन्नो गुरु प्रचोदयात्।
-श्रीगुरुदेवाय नमः। पादयोः पाद्यं समर्पयामि।(आचमनी से जल छोड़ें)

## (५) अर्घ्य

ॐ त्रिपादूर्ध्व उदैत्यपुरुषः पादोस्येहाभवत् पुनः।
ततो विश्वम् व्यक्रामत्सा शनानशने अभि ।।४।।

कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीम् तृप्यतां तर्पयन्तीम्।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ।।४।।

गन्धपुष्पाक्षतैर्युक्तम् अर्घ्यं सम्पादितं मया।
गृहाण त्वं गुरुदेव प्रसन्ना भव सर्वदा ।।

ॐ गुरुदेवाय विद्महे परब्रह्माय धीमहि तन्नो गुरु प्रचोदयात्।
-श्रीगुरुदेवाय नमः। हस्तयोरर्घ्यं समर्पयामि।

(चन्दन, पुष्प, अक्षत से युक्त अर्घ्य का जल छोड़ें)

## (६) आचमन

ॐ ततो विराडजायत विराजो अधिपुरुषः ।
स जातो अत्यरिच्यत् पश्चाद्भूमिमथोपुरः।।५।।

चन्द्रां प्रभासां यशसा ज्वलन्तीम् श्रियं लोकेदेवजुष्टामुदाराम् ।
तां पद्मनीमीं शरणमहम् प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे ।।५।।

कर्पूरेण सुगन्धेन वासितं स्वादु शीतलम्।
तोयमाचमनीयार्थं गृहाण परमेश्वर ।।

-श्रीगुरुदेवाय नमः। मुखे आचमनीयं जलं समर्पयामि।

## (७) स्नान

(शुद्ध जल से, दुग्ध से पुनः शुद्ध जल से, पञ्चामृत से पुनः शुद्ध जल से गन्ध से पुनः शुद्ध जल से स्नान करायें। यदि अभिषेक कर्म करना अभीष्ट हो तो शुद्धजल या दुग्धादि की अखण्ड धारा से श्रीसूक्त या पुरुष सूक्त का पाठ करते हुये स्नान करावें।)

ॐ तस्माद्यज्ञात्सर्वहुतः सम्भृतम् पृषदाज्यम्।
पशूँस्ताँश्चक्रेवायव्या नारण्याग्राम्याश्च ये।।६।।

आदित्यवर्णे तपसोऽधि जातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।
तस्य फलानि तपसा नुदन्तु या अन्तरायाश्च बाह्याअलक्ष्मीः।।६।।

मन्दाकिन्यास्तु यद्वारि सर्वपापहरं शुभम्।
तदिदं कल्पितं देव स्नानार्थं प्रतिगृहताम्।।

ॐ पयः पृथिव्या पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः। पयस्वतीः प्रदिशः सन्तु मह्यम्।। (दुग्ध-स्नान)

ॐ पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः। सरस्वती तु पञ्चधा सो देशेऽभवत्सरित्।। (पञ्चामृत-स्नान)

मलयाचलसम्भूतं चन्दनागरुसम्भवम्। चन्दनं देवदेवेशि स्नानार्थं प्रतिगृह्यताम।। (गन्ध-स्नान)

### शुद्धोधकस्नान

शुद्धवालः सर्वशुद्धवालो मणिवालस्तआश्विनाः ।
श्येतः श्येताक्षोऽरुणस्ते रुद्राय पशुपतये कर्णा यामा अवलिप्ता रौद्रा नभोरूपाः पार्जन्याः।

शुद्धं यत्सलिलं दिव्यं गङ्गाफलसमं स्मृतम्।
समर्पितं मया भक्त्या शुद्धस्नानाय गृह्यताम् ।।

ॐ गुरुदेवाय विद्महे परब्रह्माय धीमहि तन्नो गुरु प्रचोदयात्।

-श्रीगुरुदेवाय नमः। शुद्धोदकस्नानं समर्पयामि। (शुद्धोदकस्नान में तीर्थजल का प्रयोग करें। प्रयुक्त जल को चरणोदक के रूप में ग्रहण करे)

## (८) वस्त्र

ॐ तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।

छन्दागूं सि जज्ञिरेतस्माद्यजुस्तस्मादजायत्।।७।।

उपैतु मां देवसखः कीर्तिश्च मणिना सह।

प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिम् ददातु मे ।।७।।

ॐ गुरुदेवाय विद्महे परब्रह्माय धीमहि तन्नो गुरु प्रचोदयात्।

-श्रीगुरुदेवाय नमः। वस्त्रं समर्पयामि।आचमनीयं जलं च समर्पयामि।

(एक आचमनी जल छोड़ें।)

**उपवस्त्र :** क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्।

अभूतिमसमृद्धिम् च सर्वां निर्णुद मे गृहात्।।८।।

-श्रीगुरुदेवाय नमः। उपवस्त्रं समर्पयामि। आचमनीयं जलं च समर्पयामि।

## (९) यज्ञोपवीत

ॐ तस्मादश्वा अजायन्त ये के चोभयादतः।

गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ।।८।।

नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयं। उपवीतं मया दत्तं गृहाण परमेश्वर।।

ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्।

आयुष्यमग्रयं प्रतिमुञ्च शुभ्रं यज्ञोपवीतेनो पनह्यामि।

-श्रीगुरुदेवाय नमः।यज्ञोपवीतं समर्पयामि। आचमनीयं जलं च समर्पयामि।

## (१०) गन्ध

तं यज्ञं बर्हिषि प्रौक्षन पुरुषं जातमग्रतः।

तेन देवा अयजन्त साध्या ऋषयश्च ये ।।९।।

गन्धद्वाराम् दुराधर्षाम् नित्यपुष्टाम् करीषिणीम् ।

ईश्वरीम् सर्वभूतानाम् तामिहो पह्वये श्रियम् ।।९।।

श्रीखण्ड चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्। विलेपनं सुरश्रेष्ठे चन्दनं प्रतिगृह्यताम्।।

-श्रीगुरुदेवाय नमः। गन्धं समर्पयामि।

## (११) सिन्दूर

सिन्दूरं रक्तवर्णं च सिन्दूरतिलकप्रिये।
भक्त्या दत्तं मया देव सिन्दूरं प्रतिगृह्यताम्।।
-श्रीगुरुदेवाय नमः। सिन्दुरं समर्पयामि।

## (१२) इत्र

तैलानि च सुगन्धीनि द्रव्याणि विविधानि च ।
मया दत्तानि लेपार्थं गृहाण परमेश्वर।।
त्र्यम्बकं यजामहे सुगन्धिपुष्टि वर्धनम्।
ऊर्वारुकमिवबन्धनान्मृत्योर्मोक्षीय मामृतात्।।
-श्रीगुरुदेवाय नमः। सुगन्धिततैलं पुष्पसारं च समर्पयामि।।

## (१३) अक्षत

अक्षताश्च सुरश्रेष्ठे कुङ्कुमाक्ताः सुशोभिताः।
मया निवेदिता भक्त्या गृहाण परमेश्वर।।
-श्रीगुरुदेवाय नमः।। अक्षतान् समर्पयामि।।

## (१४) बिल्वपत्र

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रिधायुतम्।
त्रिजन्मपापसंहारं बिल्वपत्रं शिवार्पणम्।।
ॐ गुरुदेवाय विद्महे परब्रह्माय धीमहि तन्नो गुरु प्रचोदयात्।
-श्रीगुरुदेवाय नमः। बिल्वपत्रं समर्पयामि।

## (१५) पुष्प एवं पुष्पमाला

ॐ यत्पुरुषेण व्यदधुः कतिधा व्यकल्पयन्।
मुखंकिमस्यासीत् किं बाहूकिमुरू पादाउच्येते।।१०।।
मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः।।१०।।
माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो। मयाहृतानि पुष्पाणि गृहाण परमेश्वर।।
-श्रीगुरुदेवाय नमः। पुष्पं पुष्पमालां च समर्पयामि।

## (१६) धूप

ॐ ब्राह्मणोऽस्यमुखमासीद् बाहूराजन्यः कृतः ।

ऊरू तदस्य यद्वैश्यः पद्भ्यांशूद्रो अजायत् ।।११।।

कर्दमेन प्रजाभूता मयि सम्भव कर्द ।

श्रियं वासय मे कुले मातरं पद्ममालिनीं ।।११।।

वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः।आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्।।

ॐ धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वामः।

देवानामसि वह्निनतमम् सस्नितमम् पप्रितमम् जुष्टतमम् देवहूतमम् ।।

-श्रीगुरुदेवाय नमः। धूपं आघ्रापयामि।

## (१७) दीप

ॐ चन्द्रमा मनसो जातश चक्षोः सूर्यो अजायत्।

श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत्।।१२।।

आपः सृजन्तु स्निग्धानि चिक्लीत् वस में गृहे।

नि च देवीं मातरं श्रियं वासय मे कुले ।।१२।।

ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा।। अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा ।। ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा।।

साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया। दीपं गृहाण देवेश त्रैलोक्यतिमिरापहं।।

-श्रीगुरुदेवाय नमः। दीपं दर्शयामि। धूपदीपान्तरं आचमनीयं जलं समर्पयामि। (फिर हाथ धो लें)

## (१८) नैवेद्य

ॐ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत् ।

पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ २ अकल्पयन् ।।१३।।

आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीं ।

चन्द्रां हिरण्यमयीं लक्ष्मीं जातवेदो म आ वह।।१३।।

-श्रीगुरुदेवाय नमः। नैवेद्यं निवेदयामि।

नैवेद्य समर्पित करके निम्न पाँच ग्रासमुद्रा दिखावें।

ॐ अमृतोपस्तरणमसि स्वाहा।

१. ॐ प्राणाय स्वाहा। (कनिष्ठिका, अनामिका और अङ्गुष्ठ मिलावें)

२. ॐ अपानाय स्वाहा। (अनामिका, मध्यमा और अङ्गुष्ठ मिलावें)

३. ॐ व्यानाय स्वाहा। (मध्यमा, तर्जनी और अङ्गुष्ठ मिलावें)

४. ॐ उदानाय स्वाहा।(तर्जनी,मध्यमा,अनामिका और अङ्गुष्ठ मिलावें)

५. ॐ समानाय स्वाहा। (सभी अङ्गुलियों को मिलावें)

ॐ अमृतापिधानमसि स्वाहा। - दो बार जल समर्पित करें।

मध्ये पानीयं जलं समर्पयामि।आचमनीयं जलं च समर्पयामि।

**ऋतुफल**

इदं फलं मया देव स्थापितं पुरतस्तव।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि।।

-श्रीगुरुदेवाय नमः। ऋतुफलं समर्पयामि।

फलान्ते आचमनीयं जलं समर्पयामि। (आचमनी से पुनः जल छोड़ें)

## (१९) ताम्बूल

यत्पुरुषेण हविषा देवा यज्ञमतन्वत् ।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ।।१४।।

आर्द्राम् यः करिणीम् यष्टिम् सुवर्णाम् हेममालिनीम् ।
सूर्याम् हिरण्यमयीम् लक्ष्मीम् जातवेदो म आ वह ।।१४।।

पूगीफलं महाद्दिव्यं नागवल्लीदलैर्युतम्।
एलादिलवङ्गसंयुक्तं ताम्बूलं प्रतिगृह्यताम्।।

ॐ गुरुदेवाय विद्महे परब्रह्माय धीमहि तन्नो गुरु प्रचोदयात्।

-श्रीगुरुदेवाय नमः। मुखवासार्थम् एलालवङ्गपूगीफलसहितं
ताम्बुलं समर्पयामि।

## (२०) द्रव्य-दक्षिणा/भेंट सामग्री

ॐ तां म आ वह जातवेदो लक्ष्मीमनपगामिनीं ।
यस्यां हिरण्यं प्रभूतं गावोदास्योऽश्वानविन्देयं पुरुषानहं ।।१५।।
ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यातुतेमां कस्मै देवाय हविषा विधेम ।।
दक्षिणा प्रेमसहिता यथाशक्तिसमर्पिता।अनन्तफलदामेनां गृहाण परमेश्वर।।
-श्रीगुरुदेवाय नमः। कृतायाः पूजायाः साद्गुण्यार्थे
द्रव्य दक्षिणां समर्पयामि।

## (२१) आरती

- किसी थाली को अक्षत, पुष्प आदि से सुसज्जित करके कर्पूर अथवा घृत की बत्ती को प्रज्वलित कर जल से प्रोक्षित कर लें। आरती का मुख्य विधान है कि सर्वप्रथम चरणों में चार बार, नाभि में दो बार, मुख में एक बार आरती करके पुनः समस्त अङ्गो की सात बार आरती करनी चाहिये। नीराजनमन्त्र निम्न है-

कदलीगर्भसम्भूतं कर्पूरं तु प्रदीपितम्।
आरार्तिकमहं कुर्वे पश्य मां वरदो भव।।
ॐ गुरुदेवाय विद्महे परब्रह्माय धीमहि तन्नो गुरु प्रचोदयात्।
(आरती पश्चात् जल गिरा दें। फिर स्तुति करें।)
नमो ब्रह्मणदेवाय गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः।।
आकाशात्पतितं तोयं यथा गच्छति सागरम्।
सर्वदेवनमस्कारः केशवम्प्रति गच्छति।।
त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव।।
पापोऽहं पापकर्माहं पापात्मा पापसम्भवः।
त्राहि मां गुरुदेव सर्वपापहरो भव।।

## (२२) प्रदक्षिणा

सप्तास्यासन परिध यस्त्रिः सप्त समिधः कृताः ।
देवायद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ।।१५।।
यानि कानि च पापानि जन्मान्तर कृतानि च ।
तानि सर्वाणि नश्यन्तु प्रदक्षिण पदे पदे।।

## मन्त्र-पुष्पाञ्जलि

अञ्जलि में पुष्प लेकर प्रार्थना करें फिर चढ़ावें -

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः।।१६।।

ॐ राजाधिराजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे ।
स मे कामान् काम कामाय मह्यं कामेश्वरो वैश्रवणो ददातु ।।
कुबेराय वैश्रवणाय महाराजाय नमः ।। ॐ स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौमः सार्वायुषान्तादापरार्धात् पृथिव्यै समुद्रपर्यन्ताया एकराडिति तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे। आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति।।

नानासुगन्धिपुष्पाणि यथाकालोद्भवानि च।
पुष्पाञ्जलिर्मया दत्तो गृहाण परमेश्वर।।

**ॐ गुरुदेवाय विद्महे परब्रह्माय धीमहि तन्नो गुरु प्रचोदयात्।**

श्री गुरुदेवाय नमः। पुष्पाञ्जलिं समर्पयामि।

## क्षमाप्रार्थना

मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे।।

**गुरुपूजने कर्म यन्न्यूनमधिकं कृतम्।तेन सर्वेण सर्वात्मा प्रसन्नोऽस्तु सदा मम।।**

"श्री गुरुदेवतार्पणमस्तु" कहकर आचमनी से जल छोड़ें और श्रीगुरुदेव को साष्टाङ्ग प्रणाम कर स्थान से उठें।

**********************